काव्यप्रकाशटिप्पणी

५६२

॥श्रीगणेशाय नमः॥ ननु ग्रंथारंभे प्रेक्षावत्प्रवृत्त्यौपयिकप्रयोजनाभिधेयसंबंधानभिधानादर्थांतरत्वादिदोषदुष्टस्य समाप्तिं प्रत्येतस्य तो व्यभिचारेण फलांतरस्याभावेन च निःफलभारतीस्तुत्यादेरभिधानाद्ग्रंथकर्तुर्भ्रांतत्वेनानवधेयवचनत्वमित्याशंकामपाकुर्वन् श्लोकप्रथमकारिकामवतारयति ग्रंथारंभ इति। ग्रंथत्वे यारंभाद्युपाधिरन्यस्य प्रायशो निर्वक्तुमशक्यत्वात्। आरंभशब्दोत्र लक्षणया तत्प्राथम्यावच्छिन्नवचनः। फलेति विघ्नविघातसामर्थ्यप्रतिपत्तिश्च तत्र प्रयोजनं। यत्तु आरभ्यतेऽस्मिन्निति व्युत्पत्त्या तद्वचन इति। तन्न। एतावताप्यारंभकालस्यैव लाभेन पूर्वकालीनसंस्पर्शात्। सप्तमी चेयमधिकरणे। यत्तु चर्मणि द्वीपिनं हंतीतिवन्निमित्तसप्तमीयं आरंभशब्दश्च यथाश्रुतार्थक एव चेति। तन्न। आद्यसमयसंबंधरूपस्यारंभस्य मंगलाफलत्वात्। विघ्नविघातफलकत्वेनोपस्थितस्य फलांतरनिराकांक्षत्वाच्च। केचित्तु ग्रंथारंभ इति समाप्तिं प्रत्युभयतो व्यभिचारादाह विघ्नविघातायेति। विघ्नः प्रतिबंधकमदृष्टं विघातो ध्वंसः। यद्यपि विघ्नसमसंख्यमंगलहेतुत्वे नान्वयव्यभिचारः समाप्तिगतवैजात्यकल्पनाद्वा न व्यतिरेकव्यभिचारोपि समाप्तेरभावरूपतायामनुद्देश्यतापत्तेश्चरमवर्णनिरूपायाश्चरमवर्णाभिकार्यावातस्याज्ञा... प्रायश्चित्तादिजन्ये विघ्नध्वंसे व्यभिचारात्सोपि न फलितकल्पने बाधकाभावात्। अस्तु वा ये धर्ममात्रकल्पनमन्यथा... निर्विघ्नसमाप्यतामिति कामनया तत्कल्पनेनालस्यान्यथाप्येकेन हरिनमस्कारेणानेकविघ्नध्वंसस्य सामान्यकत्वान्निर्विघ्न... एवं च प्रकृतसिद्ध्यौपयिकतया नार्थांतरत्वं गृहीतविशेषणान्यायेन विघ्नध्वंसस्यैव फलत्वकल्पनौचित्यात्। तदुक्तं ... प्रयोजनाद्यनभिधाननिबंधनानवधेयवचसमाप्तौ व्यभिचारेपि विघ्नध्वंसे न स इति न निःफलत्वं मंगलस्य न वा प्रयोजनाद्यनभिधानं ... समुचितेति। वचनरचनाविशेषस्य ग्रंथत्वं ग्रंथकृतः। प्रतिबंधकाभावसंपादनस्य प्रथमकर्तुमुचितत्वादिति भावः। इष्टेति। उपास्यमाने सर्थः। पुरा मृगरातिस्तोतीति जयतीति कारिकास्य पदस्वरसात्। लेधस्य तदेकसाध्यत्वादिति भावः। ... नमस्कर्त्री यत्वेन स्मरतिसर्वोत्कृष्टत्वेन प्रतिसंधत्त इति वाच्यमाम न तिते रूत्तरग्रंथविरोधः। उपरामृगरातीत्यस्य नमस्कर्त्री य...

॥ व्यक्तिमादधतीत्यर्थ इति। तन्न। विघ्नविघातायदेवतां परामृशतीत्यवतारणविरोधात्। शब्दस्य विघ्नविघातासामर्थ्यात्।
देवतात्वासंभवाच्च। केचित्तु निर्मितिरसामान्यव्यक्तिमादधती कवेर्भारती वचनरूपा जयतीत्येवार्थः। भारतीपदं च लक्षणयाऽधि
ष्ठाधिष्ठातृपरं। न च कविपदवैयर्थ्यं गंगायां घोषः प्रतिवसतीत्यत्रेव वाक्यार्थसंबंधित्वेन लक्ष्यप्रतीतेरुद्देश्य-
त्वात्। न च तत्र लक्ष्यनिष्ठशैत्यपावित्र्यरूपप्रतीतिवदत्र न किंचित्प्रयोजनमिति वाच्यं। अत्रापि शिवादिमंत्राधिष्ठातृदेवता
वेल्लक्षणेनासाधारणोपासनीयत्वेनोपस्थितेरेव सत्त्वादित्याहुः॥ वयं तु तदधिष्ठातृशक्तिरूपस्य भारतीपदस्य कविपदस
मभिव्याहारनियंत्रितस्य वचनरचनेवार्थः। अत एव न कविवाङ्निर्मितिरिति वृत्तिविरोधः। निर्मितिश्च निसृष्टिर्मितिर्ज्ञान
मिति कष्टत्वाज्ज्ञानात्मकरसरूपा। रसस्य नित्यतया न तत्रादृष्टादिकारणापेक्षेति न नियतिकृतेत्यादिविशेषणयानु
पपत्तिः। अनन्यपरतंत्रामित्यत्राधिपर्यांतरानधीनां स्वप्रकाशामित्यर्थः। परमात्मवादीति च तत्राप्यपि परतंत्रात्तद्विषयि
णीत्यर्थः। सरस्वत्येकफल्कामिति वार्थः। काव्यस्य वचनरूपस्य कार्यतयाऽदृष्टादिनिमित्तकारणाकाशाद्युपसमवायि
कारणोपस्थितात्ताकाशसंयोगरूपासमवायिकारणसापेक्षत्वात् तत्त्वाद्रूपकत्वात्तदनुपपत्तेः। देवतारूपार्थनिष्ठजयप्र
तीतिस्तु व्यंजनया। व्यंग्यार्थमादधती च विघ्नविघातायदेवतामित्याद्यवतारणएवं च भारतीनिष्ठजयप्रतीतिःशब्दश
क्त्या व्यंजनया न त्वादिप्रतीतिस्तु पार्थनिष्ठव्यंजनया अर्थस्यापि व्यंजकत्वस्य वक्ष्यमाणत्वात्। अत एव जयत्यर्थेन येनत्रापीपु
दोपादानमितिवित्त्रोक्यामः। नियतिरदृष्टं प्रभावो वेवतादृशासौरसमित्यत्राऽदृष्टनियामकं अत्र तु कमनीयकामिनी
मुखे वितद्दर्शनानंतनियम इतिभावः। अदृष्टस्य कार्यमात्रजनकत्वात्तदजन्यत्वमसंभवीति तत्कृतनियमपर्यंतानुस
रणं। अग्रे तनवृत्तौ वक्रमपिदं समवायिकारणस्पंदपरतया व्याख्येयं। तेन पतिवोगिनोनात्ते दृश्यवधेयं। वस्तुतो निय
नियति मांते सौरत्यादयोऽनेन तिरस्काराणामः परमात्मादिः कारणतावच्छेदकः कार्यतावच्छेदकश्च सौरत्वविशेषत्वादिस्तत्कृ
तो योनियमस्तद्रहितामित्यर्थः। अन्यथा हि सौरत्वविशेषत्वावच्छिन्नं प्रत्यावच्छिन्नेनेव यन्निमीयते तन्नसारत्वापत्तिरि
भावः। एवं चाग्रे तनवृत्तौ कर्मपदस्यादृष्टार्थकत्वेपि न क्षतिः। नियमरहितामितिकृते कविसिद्धनियमस्याप्यत्तावश्यसंगतेः।

भावात्

सोढव्यः समाश्रयणीयाच निर्वीजापि लक्षणा। एकदेशशाकस्य विशिष्टेशासंभावात्। नचपरामर्शपदेन स्वरूपाभि
धानमपि लक्षणायैव तथा सति जयतिपद एव लक्षणा स्थितिचार्यं। वीजोऽत्र तु भक्तिश्रद्धापूर्वकत्वप्रतिपत्ति
रेव वीजं। भक्तित्वश्रद्धात्वयोः ज्ञानत्वव्याप्यजातित्वादिति युक्तमुत्पश्यामः। ज्ञानविशेषविशिष्टत्वाद्व्यापारस्य
स्फुर्तित्वेन ज्ञानस्यापि स्फुर्तित्वाद्युक्ता लक्षणायाः स्वशरीरपिनैतद्यानइतिकश्चित्तातन्न। एकदेशशाकस्यावशिष्टस्य
रत्वे विनालक्षणामनिर्वाहात्। भारतीसरस्वतीजयतितु लक्षणावर्तते नतु वर्तनाभित्यर्थः। आशंसितस्योत्कर्ष
स्याराध्यत्वाप्रयोजकत्वात्। जयप्रयोजकं विशेषणमाह कवेर्निर्मितिमादधतीति। निर्मीयत इति व्युत्पत्त्या नि
र्मितिः काव्यरूपैवाच्यतावपि यादृङ्मितिरिति कर्मधारयः नतु वाचां निर्मितिरिति तत्पुरुषः षष्ठ्यर्थलक्षणापत्तेः
अतो न तद्विरोधः। नच कथं जन्यां निर्मितिं जनयन्ती स्वर्थपर्यवसाने घटं प्रति कुलालवत् पितुरिव भारत्या अन्यथासि
द्धिरिति वाच्यं। यथा तार्किकाणां मते घटपटादिकार्यविशेषाणां द्विकर्तृकत्वं तथास्माकमपि काव्यं द्विकर्तृकमित्य
भ्युपगमात्। वस्तुतस्तु कवेः शब्दात्मककाव्योपादानरूपाकाशगोचरापरोक्षज्ञानाभावान्न कर्तृत्वं किं तु सरस्वत्या
एव। नच शब्दमात्रेण काव्यमपि तु रचनेति वाच्यं। तस्या अपि ज्ञानरूपत्वेन कवेस्तत्कर्तृत्वस्याप्यसत्वादिति ध्येयं॥
कवेः सामान्यतो निर्मितिमात्रजनकत्वं भारत्याः स्फुनियतीत्यादिविशेषणविशिष्टनिर्मितिं प्रति जनकत्वमिति भास्क
रमिश्राः। तन्न। विनिगमनाविरहात्। वस्तुतः कवेर्निर्मितिं कवेः काव्यजननानुकूलं ज्ञानं शक्तिं वा जनयन्तीत्यर्थः
कार्यकारणयोरभेदोपचारान्नियतीत्याद्युक्तरीतित्वं। यच्च पिनिर्मितिजनकत्वमुभयोर्नैकं तथापि तत्तद्वाच्यत
नकत्वमेकमेवेत्यत्र तात्पर्यं। अत एव नवरसेत्यत्रापि रसपदवाच्यत्वरूपसाधारणधर्मसत्वाद्व्यतिरेकोपपत्तिः। यत्तु
कवेर्भारतीति संबंध इति तन्न। कविपदवैफल्यात्। कविपदसमभिव्याहृतभारतीपदस्य काव्यात्मतया प्रसिद्धरूपस्य
[illegible] कवेर्भारतीवचनरूपैव जयति निर्मितिरसाभि
रस्यत्वां निहतापचनापत्तेश्च। यत्तु

निरन्तरं रहितामिति हेतेस्ततः संलविप्रहार्थं यं जनकस्य लेशः व्याप्तेर्विविरोधमुपान्तं। नियम्यतेऽनेनेति नियतिः कालः। अप्रसूनि
मितो वंदनादीनामूष्मत्रीतादि कालमेदेन सुखदुःखादिवैचित्र्यमन्तरासर्वदैव कार्येन सुखस्यैव जननात् ह्लादाहित्वमित्य
2 र्थः। नवरसाह्लादैकमयीमित्यनेन पौनरुक्त्यं। तस्यैव कस्मिन्नपि काले सुखातिरिक्तजनकत्वविरहोपदर्शकत्वात् ह्लादेवरा
जनकत्वाद्यकत्वाद्वेति केचित्। ह्लादैकमयीमिति। आनंदमात्रजनिकामित्यर्थः। नत्वात्र पूर्वकाले क्वसर्वं ज्ञरसुराणानवके
वलाः समानाधिकरणेनेत्यनेन समानाधिकरणसमासे एकपदस्य पूर्वनिपातापात इति वाच्यं। एकशब्दपर्यायत्वस्य तन्मुख्य
तेयस्यासेकमयीतिप्रथमत एकपदस्यैव मयटो विधानात्। अनन्तरं ह्लादैनमयीमित्यन्वयात्। तृतीयातत्पुरुषे गुणवच
नेनेति सूत्रात्। सुवर्णे नयनीतिवत्। इति भट्टभास्करमिश्राः। वस्तुत एकपदमात्रार्थकतेन ह्लादेतरव्यवच्छेदमयीमित्य
र्थे सामानाधिकरण्याभावात् संख्यार्थकत्वविरहाच्च न पूर्वनिपातः। ननु कथमेतत् मानुषतपथेन दुःखजननात्। करु
णादिरसेव तस्य स्फुटत्वात्। अर्थविगमात्तावेन क्वचिन्नो हननं नाप्नोतीति चेतान। रामुपघञ्चवत्तान तत्र सुखस्यैवानु
भवात्। तदीयत्वमेतिसंधानेन च दुःखजनने तस्यैव तत्वनकाव्यस्य। रतिकालेनखक्षतमुष्टिताडनादेरिव। करुणादे
रपि काव्यानि नयानि माखादमानतादशायां हृद्यत्वस्यैवानुभवसाक्षिकत्वात्। विभावादीनां विशेषतानांतत्व विशेषां
दोषस्याथ्यो नोऽखंडानंदरूपत्वाच्च। अन्यथा तत्र प्रेक्षावत्प्रवृत्त्ययोगात्। क्वसन्नवुध्यविषयीत्वात् सर्वस्य ब्रह्मत्वेनाकाः
व्यत्वात्। अथ कत्पन्नबुध्यविषयाप्रत्वे वा किमपराद्धं काव्येन। न हि निरस्तनयनानिरीक्ष्यमाणतया निरतिशयरामोऽपि जन
ककमनीयकामिनीकुच कनककुम्भमध्यवर्तमानकान्ति कर्दमस्य कमप्यपराधमाकलयामः। अनन्येति। अन्यो स्वारतीति
न्नः स्वारत्या एव प्रकृतत्वात्। परतंत्रेति। शब्दप्रमायत्ववचनः। न हि तराणां रुदीनेदि क्वराधीन वृत्तिरितिवत्। तेन स्वारतीति ना
यत्वरहितामित्यर्थः। तथा चान्यपदं परपदार्थयोर्न पौनरुक्त्यं। अन्यपदेनात्रव स्वकसदृशविषयित्वोक्तौ व्यतेतत्परतंत्र
तारूपा मित्यर्थः। प्रसन्नमिति। सन्मानतादिच्छाधीनत्वमत्रत्वसदसद्रूपगोचरकवीच्छाधीनत्वमो ह्लादिकार्थवाक्य
तात्। अन्यानिमित्यर्थः। प्रसन्नमिति। सन्मानत ... । कवीच्छायाः अपि रसाभृंगाघसदृशगोचरत्वाच्च। अनन्याकाव्यास्ति
न्यादितमधुमतीहेतः। तत्र। अपदार्थत्वात्।

न्याप्रतिभा तत्परतंत्रां तदन्वयव्यतिरेकशालिनीमिति परमानंदस्तत्प्यसत्वानिमित्तकारणरूपायाः प्रतिभायाः काव्यहि
न्वत्वात्। एवंस्तत्प्रतिभायाश्चान्यः स्वस्मात्परश्च तदायत्तत्वरहितामित्यर्थ इति। सुबुद्धिमिश्राः। अन्यो भारती स्निग्धं क
चित् तस्मात्परोन्यपरस्तथा च कविचित्तेनातंत्रत्वभूत्यामित्यर्थ इति प्रदीपकृतः। तन्न। भारत्यनधीनत्वस्याप्यापत्तेः। अ
न्यः परः श्रेष्ठो नयस्मात्सोऽनन्यपरस्तत्तंत्रामिति निर्व्याः। तन्न। न विद्यते परः श्रेष्ठो यस्मात्सोपरस्तत्तंत्रामित्येतावतैव
सामंजस्ये ऽन्यपदवैयर्थ्यात्। अन्यपरोऽसारतीपराङ्मुखचित्तस्तदन्यो नन्यपरस्तत्तंत्रामिति कौमुदीकृतः। एतेषुव
व्याख्यानेषु सहकारिकारणपरतंत्रेति वृत्तिविरोधः। तत्र तत्र दर्शितभावात्। नवरसेति। नव च ते रसाश्चेति नवरसाः। इ
ति न समासः। दिक्संख्ये संज्ञायामिति संज्ञायामेव तद्विधानात्। अपितु नवरसा यस्यां सा नवरसा नवरसा सा रुचिरा चे
ति कर्मधारयः। न च हृद्यैवेति रितिहेतूपदर्शकवृत्तिविरोधः। तस्याः समासेऽतात्पर्यात्। तेन विकादिसाधारत्वोः षड्रसे
रूपजन्यहितावतोनोन च हृद्यैवेति तदर्थात्। अन्यथा षड्रसानृचहृद्येवेति व्यतिरेकद्वयप्रदर्शने विरोधः। तत्कुरूपस्या
नरपदार्थप्रायान्वात्। अथ पुष्पार्थनियोजयन्नेव व्यतिरेकालंकारं स्फुटयितुं व्यतिरेकमुखेनैव व्याचष्टे। नियतिशक्त्येत्ये
ति। सुखदुःखेति। सुखदुःखमोहानां स्वास्मिन्नभावो यस्याः सेति एकस्त्यात् सुखदुःखमोहजनिकस्य प्रचः। यद्वा सुखदुःखमो
मोहरूपसत्वरजस्तमोलक्षणप्रकृतिविकृतिर्विश्वमिति तस्यापि सुख्याद्यात्मकत्वं कार्यकारणयोरभेदात्। एकस्यामेव हि
कमनीयकामिनीतनौ तरुणस्य संयोगवियोगावस्थायां च सुखादयो नुभवसिद्धा एवेति सांख्यवृद्धाः। परमाह्लादेति। अ
त्र कारणशब्दः प्रत्येकमन्वेति द्वंद्वपरश्रुतत्वात्। कर्मपदस्यादृष्टार्थकत्वे सहकारिपदं निमित्तायकं क्रियापरत्वेऽस
मवाय्यर्थकमित्याकलनीयम्। यद्यपि निमितेरपि वचनरूपत्वादुपादानादिसापेक्षत्वमावश्यकं तथापि सोऽसदरूपादा
नयत्नमादितदनपेक्षत्वं तदर्थः। मुख्येपि तद्भूणनादित्याशयः। न पतिशक्ति पाद्य कविनिर्मित्यः कर्तृत्वस्य विशेषानुणाद्य
नेन निखिलनिर्मितेरेव प्रतियोगित्वेन त्वान्नैसाच ब्रह्मत्वापुवभवतीत्यत आह ब्रह्मणइति। सा वानुशिष्टक्लिनूशलया
ननिर्मितिपरस्य मिस्रदृशानवायित्वदासिद्धेरुत्पादनकर्तृत्यब्रह्मणिविलक्षितप्रतीतिकामितिभावकरणोसया।

कुत्रिशत्युट् प्रत्ययांतपदेन व्याचष्टे। निर्मितिर्निर्माणमिति निर्मितिपदमुत्पत्तिप्रसिद्धं ब्रह्मणाद्युत्पत्तिप्रसंजकं माभूदिति निर्माणपदेन निर्मिति
विशिष्टवाचकतामनुरूपप्रसिद्धेन व्याख्यातमिति तु कश्चित्। आदधीत्यस्य विशेषणस्य हेतुगर्भत्वं स्फुटयति अतएवेति। तथाचव्यतिरेकाद्ये
कारानुगृहीतो नहेतुत्वत्वंकारइति द्रष्टव्यं। ननु नतिं विना स्यविघ्नविघातकत्वे ननतेरपि स्तुतिवत्कर्तव्यत्वमुचितं। नच स्तुतिमात्रं विनाऽस्य
विघ्नस्यैवात्र सत्वेति पिहितलोचनैः ग्राह्यं ज्ञातुमित्यत आह। जयत्यर्थेन चेति। जयत्यर्थेन स्तुतिरा आक्षिप्यते व्यज्यते। तथाचाभिधेयास्तु
३ तर्व्येऽज्ञकेन याचनतेः करणान्नकापि दोषइति भावइति वयं विलोकयामः। ननु नतिकरणे स्तुतेरवश्यमाचरणं। स्तुतौ तु न तथा भूद् स्तुतौ व
नेकान्तादिति चेन्न। व्यंजनायां व्याप्तेरंगत्वेन व्यभिचारपि दोषाभावात्। केचित्तु जयत्यर्थः सर्वोत्कृष्टत्वं तेनाक्षेपोऽनुमानमेव। यथाभार
तीमस्वीतियोगिकोत्कर्षाश्रया सर्वप्रतियोगिकोत्कर्षाश्रयत्वात्। नचतथापि स्वापकर्षालाभेन नमस्कारालाभः अपकृष्टतापकृष्टः तन्निष्ठो
त्कर्षावधित्वसत्वादित्यस्यापि स्तुवचत्वादित्याहुः तदसत्। स्वापकर्षक्रियात्वेनैवास्यैवाक्षेपस्यानुमानरूपस्य नमस्कारत्वेन तस्याक्षेप्यत्वा
नापत्तेः ननु भारतीनमस्कार्या सर्वोत्कृष्टत्वादेवं चाहं तन्नमस्कारवान् मंगलप्रवर्तत्वे सति तद्विशेष्यकोत्कृष्टत्वप्रकारकज्ञानवत्वादित्य
स्त्विति चेन्नैवं। अनुमितेर्व्यापकतावच्छेदकप्रकारनेयत्यनत्वं प्रणीतास्मीसेवंरूपानुमितेरभावात्। भावे वा व्यंजनायास्ते भूतसामग्री
कल्पेन तयैवाद्बोधादनुमितानुमानस्य विलंबितत्वात्। अन्यथा सर्वत्र व्यंग्यार्थोपस्थितिरनुमानेनैवेति व्यंजनादत्तजलांजलिः स्या
न दितिदिक्। नन्वेवं भारतीनमस्कारस्यान्वयः। नमस्कारोमीति क्रियाकल्पने च स्तुतरां प्रत्ययांतरनिपस्तत्प्रतिबंधकत्वं च नमस्करोतीत्यर्थे चेति
रूढार्थतयैव जयतीति कर्त्रर्थकप्रत्ययेन नमस्क्रियत इति कर्मार्थकतत्कल्पनायाः असंभवादित्यत आह। तेन नतामिति। लभ्यत इत्यनेन व्यं
जनालभ्यार्थो नक्रियाकर्मभावापन्नतयोपतिष्ठते। किंतु वाक्यार्थभानोत्तरकालं स्वातंत्र्येणैव। अन्यथा वाच्यसिद्ध्यंगतापत्तेर्ध्वनित्वासं
भवादिति गम्यते। अत्र स्तुत्यनुभावव्यंग्यभारतीविषयकरतिभावस्य व्यंजनेनालक्ष्यक्रमव्यंग्यस्य। व्यतिरेककाव्यलिंगयोरलंकारयोर्न
निरूपवस्तुनश्च व्यंजनेन लक्ष्यक्रमव्यंग्यस्य च भेदाद्ध्वनिद्वैविध्यमत्र प्राधान्येन प्रदर्शनीयमिति ध्वनितं॥ ॥ननु प्रयोजनाप्रतिपादने
दृष्टसाधनताज्ञानाभावान्न प्रेक्षावत्प्रवृत्तिः स्यादित्यत आह। इहेति। तथाच काव्यमनूद्य तत्र प्रयोजनमेवायिम कारिकयाभिधीयत इत्यर्थः।
सप्रयोजनमाहेति केचित्पाठः सचायुक्तः तत्र काव्यस्यैवाभिधेयतावगमात् नचात्र काव्यमभिधेयं अपितु तद्व्यरकीभूतदोषगुणालंकारवा।

ग्यं कल्पितमिति प्रत्युपजप्यते । कश्चित् कंचित् स्वसाहाय्यार्थमेति । ग्रामशब्देन तत्र सपदि चेको निरुपिततः कामुक इति
द्योत्यते । अत्र भयतीति च तमिमानव्यपदेशेन दर्शनीये वर्णपाशविरामः स्त्र्यते । स्वयं स्वयंकेतकरतालस्वरूपत
त्रागमनात्पुरुषस्य तत्रागमनाद्युरवये वर्णपमिति सर्वथा । अत्र गुणीभूतव्यंग्यं किमित्याकाङ्क्षायामाह अत्रे
ति व्यंग्यं नैव वंजुलनमजरी त्यादिपदेन सूचयः । तदपेक्षया व्यंग्यापेक्षया । कामुकदर्शने न कामिन्याः स्वीयवि
कासस्यासंभाव्यस्य विपरीतेन चैव वर्णेन वाच्यस्य विशेषस्यैव चमत्कारित्वात् । चित्रं द्वाथ माहचित्र
मितीति । गुणालमाधुर्यादयस्तेपुनः रसधर्मानित्र्य पूर्वाशब्दगुणाः अर्थगुणा इत्युच्यन्ते । तथाच वक्ष्य
ति । गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मतेति । शब्दालंकाराः अनुप्रासादयः अर्थालंकाराः उपमादयः
तैर्युक्तं । अव्यंग्यमितीति । अर्थो व्यंग्यरूपः । अवरं अधमं । तत्राद्यं यमधमं तावदुदाहरति भागप
र । तच्चशब्दचित्रमुदाहरति स्वच्छन्देति । मंदाकिन्याः मंदता जडता अज्ञानं । त्रिपथगा मनयत्तु । कीदृशी गंगा स्व
च्छंदेन स्वेच्छया उच्छलंतः अच्छा निर्मलाः कच्छकुहरेषु जलप्रायप्रदेशानि नदस्थलेषु छातेतराः अछि
न्नाः स्थूलाः अंबुच्छटाः जलकणाः ताभिर्मूर्छन्न उपमोहोपवानेषु हि भिः ऊर्मिला मिलिताः
नमाद्भिकवयस्पासा । उघतः उच्चारा यूथवः देवे रामकाया सुताथ्यतादर्शश्चितामि दीर्घबुद्धारिक
पुरुसहं केतुकुमे पुरोहित कोयवा तेषु तमसो मंदप्यं तेमुदिरः अधिको मदो यस्याः सा । अत्र वृत्त्यनु
प्रासेन चैव चित्रं । यद्यपि मंदाकिनी विभयोरत्पारस्पा भावो व्यंग्यो स्तितथाप्यनुप्रासकवेस्तात्पर्यान्निरोधी
यते । वाच्यचित्रमुदाहरति । विनिर्गतमिति । यदृच्छया प्रिन्सातमं दिराद्विनिर्गतयत्नपश्य त्यामरावतीसस
द्मसंतोषेणाद्भुतं पातिताः गलाय स्थामपं विधासती भयेन निमीलितार्थी च मरुव ति । कीदृशी । आ श्रितानां
वज्रमानं ददाति रिपूणां चाभिमानं ददतीति वामानंदं । अत्रोत्प्रेक्षारूपे अर्थालंकारे कवेस्तात्पर्यात् ततोपि
वी शब्दयोर्व्यंग्यपार्श्विरो धीयते ॥ ॥ इति काव्यप्रकाशटिप्पण्यां प्रथमोल्लासः ॥ ॥ प्रथमोल्लासे शास्त्रीयौ
काव्यमित्युक्तं तत्र कतिविधाः शब्दाः । ...भागप्रतिपादनपरत्वेनत्तरश्लोकमवतारय

ति क्रमेणेति। तद्देशक्रमेण। स्वरूपं विशेषस्य रूपं विनागमित्यर्थः। न च यदि शास्त्रादौ व्यंजकत्वव्यवहाराभावात्क
थं नैयायिकमित्याशङ्क्य वैयाकरणाश्रयणेनाह अत्रेतीति। अगम्यस्येव रसस्य प्रतिपादके काव्ये व्यंजकः श
ब्दोपस्थापी। तन्नैयायिकमतेऽप्यविरुद्धमिति साधयः। बुधा वैयाकरणैः स्फोटप्रतिव्यंजकस्य ध्वनेर्व्यंजकत्वाश्रयणात्काव्यप्र
हणानुपपन्नत्वम्। तदस्याः वाच्यकादीनामर्थानां क्रमेण वाच्यलक्ष्यव्यंग्यादिरूप इत्यर्थः। केचिद्धादिति रन्यस्तात्पर्या
र्थोऽप्यंगीक्रियते तदाह तात्पर्यार्थोऽपीति। केषुचिन्मतेषु। एतदेव स्पष्टयति आकांक्षेत्यादिना। आकांक्षा प्रति
पत्तुर्जिज्ञासा। आकांक्षितानां योग्यतानामेकबुद्ध्यारूढत्वं सन्निधिः। योग्यता बाधकप्रमाणविरहः। एतद्वशाजी
त्पादिर्जीतिरेव वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये। अपदार्थः पदार्थव्यतिरिक्तः। वाक्यार्थोऽपि स्फुर
ति। अपि शब्दार्थोऽपि पदार्थवाक्यार्थयोरन्वितत्वेन प्रतीयमानत्वादिति प्रमाणकम्। गामानय शुक्लां देवदत्त दं
डेनेत्यादौ पदानि स्वार्थमभिधायान्वितानि लक्षयन्तीति ये वदन्ति तेऽभिहितान्वयवादिनः। चकारश्च नायमेव पक्षो
प्रामाणिक इति सूचितम्। अभिहितान्वयवादिनामित्यनेन सूचितं पक्षान्तरमाह वाच्य इति। पदान्यन्विता निभि
त्वा पश्चाद्विशिष्टमर्थं कथयन्तीति यो वदति सोऽन्विताभिधानवादी तस्य मतमित्यनुषज्यते। अत एव वाक्या
र्थो वाच्यः। एकवचनेनास्याप्रामाणिकत्वं सूचयति। व्यंजकस्यैव काव्योपयोगित्वादितरोपादानं किमर्थमित्या
शंक्याह सर्वेषामिति। वाच्यलक्ष्यव्यंग्यानां व्यंजकत्वमिष्यते। प्रायश इति न सर्वदा। अपि शब्दाद्वाच्यत्वादिकम
याः शब्दपि। वाच्यलक्ष्ययोरर्थयोर्व्यंजकत्वेन तत्प्रतिपादकयोर्वाचकलाक्षणिकयोरपि परंपरया काव्योपयोगादुपादान
प्युक्तमिति भावः। वाच्यादीनां व्यंजकत्वे क्रमेणोदाहरणम्। काचिद्दत्तसंकेता तत्र जिगमिषुर्व्याजेन श्वश्रूं प्र
तिकथयति। माएहीति। घरो च अरण्यगृहोपकरणं तण्डुलादि तेनोपकृतमित्यर्थः सूच्यते। अघोसनेन स्त्रीप्रत्यं।
त्वयेत्यनेन न मया व्याजेनेति। भणोत्यनेन न प्रेरणार्थः सूच्यते। ठाइति तिष्ठति। तेन सायंकाले मम पतिव्रताया ममग
मनं नोचितमित्यात्मनः शुद्धत्वं द्योत्यते। अत्रेति। प्रमाणान्तरावगतव्यभिचारिणीरूपवक्तृवैशिष्ट्ये। स्त्रीच्छा हा क्या
र्थो व्यंजक इत्युत्प्रेक्षायः। काचिन्नायिका स्वप्रियोपभुक्ता इति प्रत्याह साहंतीइति। साधयन्ती प्राप्ययमाना॥

अत्रेति। वाक्यस्य विपरीतलक्षणया शत्रुत्वं लक्ष्योऽर्थः। स इति रूपयोर्द्वयविशेषो व्यंजकस्यार्थः। कश्चित्कामुकं प्रति संकेतस्य
त्वमित्याह उपेति। चलनं शारीरो व्यापारः। स्पन्दोऽपि च एव व्यापारः इति न पौनरुक्त्यं। अत्र व्यंग्यस्य व्यंजकत्वं दर्शयति अत्रेति। निध
न्यं इत्येतद्वाक्येन विश्वासयुक्तत्वं व्यंग्यं तेन जनरहितत्वं व्यज्यते। फलितमाह अत इति। प्रकारान्तरेण। अर्थस्य तत्त्वस्य व्यंग्यस्य व्यं
ग्यस्य व्यंजकत्वमाह अथवेति। यदि त्वमनागतो भूस्तर्हि किं विलम्बाया विभ्यस्त्वं नोपपद्यत इति भावः। अर्थस्य रूपक
थनानन्तरं प्राप्तं दिद्धिष्या वाचकादीनामपं लक्षणायसरे इत्युक्तत्र मक्रमं वन्तारयति। वाचकादीनामिति। यः अर्थमभिधत्ते स
वाचक इत्यभिलक्षणं काव्यवृत्तिव्याप्तिर्दर्शिता संकेतितमिति। एवमप्यचिताभिधानवादिनगणायायाबोध इत्यत आह
रव्यार्थ अव्यवहितत्वतदा तावत्पि संकेतसद्भावा शत्रेवाति व्याप्तिरित्यत आह साक्षादिति। तावत्प्रकथ्यमाने पदे इह मिलादौ से
द्यामेति योऽभिस्तत्परिहाराय यशार्थ्यप्रस्तावा घः शब्द इतिन्द्र इत्यव्यय। यस्मिन्नन्ते जत्ये संकेतास्तावत्स्तत्र संकेतितमर्थमभि
धत्त इत्येकं लक्षणं। यः साक्षादभिधत्त इति द्वितीयं। अभिधत्त इत्यतिप्रतिपादयतीत्यर्थः। ननु त्वत्तिधिया वोधयतीत्यर्थः। अ
भिधया प्रतिपादको वाचकः वाचकव्यापारोऽभिधेत्यन्योन्याश्रयप्रसंगात्। संकेतप्रतिविप्रतिपत्तिं निराकुर्वन्नभ्रेकोऽत्पा
करोति। इहेत्यादिना। इह लोकव्यवहारे। अगृहीतसंकेतस्याप्यर्थप्रतीतिरस्तीति तन्निवृत्तये विशेषग्रहणं। संकेतो
नाम शब्दार्थयोः संबंधावधारणं। शब्दस्य संकेतितार्थाभिधायकत्वं सकृदपि संकेतितार्थज्ञानमन्तरेण न संभवती
ति संकेतितमर्थं विभजते। संकेतित इत्यादिना। संकेतविषयः कृतः संकेतितः। आदिशब्देन गुणक्रियायदृच्छाशब्दा
गृह्यन्ते। ननु व्यक्तिरेव संकेतितार्थोऽस्तु। अर्थक्रियाकारित्वेन पुरुषप्रवृत्तिनिवृत्तियोग्यत्वादित्याशंक्याह यद्यपीति।
ननु सर्वासु व्यक्तिषु संकेतः कृतिपृथक्सुधा तत्राद्यं निराय घटेनानन्त्यादिति। द्वितीयं निराकरोति। व्यभिचारादिति। व्य
भिचारः संकेतितार्थव्यतिरिक्तेऽपि गवि गोव्यवहारः। इति शब्दस्योपाधावेव संकेतः स्वयंपद्यते। व्यक्तेः संकेतितार्थ
त्वपक्षे दोषान्तरमाह गौः शुक्ल इति। यदि व्यक्तिमात्रं संकेतितार्थस्तदा जातिगुणादिविभक्तत्वेन न व्यवक्रियेतेत्या
र्थः। चकारस्तु कथं ब्रह्मसमुच्चयार्थः। तं क्रममर्थमुपसंहरति। तदुपाधावेवेति। तस्याप्यर्थक्रियारूपाधौ विशेषणाजात्यादौ शब्दे
प्रवृत्तिनिमित्तमित्यर्थः। जात्यादीनां संकेतविषयत्वमुपाधिविभज्य तदुपाधयस्येति। वस्तुधर्मो वास्तवो नैसर्गिको धर्मः।।

वक्तास्वेच्छया आरोपितो धर्मः। यस्क धर्ममपि विविनजते तस्क धर्म इति। आद्यः पदार्थस्य प्राणप्रदं च प्राणप्रदः। जातिं विना
चरक्रनः स्वरूपमेव न सिध्येदित्यर्थः। जातेः प्राणप्रदत्वे संमतिमाह गकं हीति। स्वरूपे वा पिंडमात्रे वा गो गौरिति व्यवहर्तुं ने
शक्यते अतिप्रसंगात्। नाप्यगौरिति व्यवहर्तुं शक्यते अगोव्यावृत्तत्वात्। अतः गोत्वजातियोगादेव पदार्थस्य स्वरूपं लभइ
5 त्यर्थः। द्वितीयो विशेषाधानहेतुः। शुक्लादेर्गुणस्य विशेषाधानहेतुत्वं कथयति शुक्लादिना हीति। अनेनोत्पन्नस्य प
श्याकृतो न विशेषो न वामिति दर्शितं। अतो जातिगुणयोर्महान्भेदः। साध्यस्य लक्षणमाह साध्य इत्यादिना। तृतीयोपरीत्यक्ताः
।अविभायतोदयोः कृयकायस्याः पचनादिक्रियायास्तद्रूपः। वक्तृयदृच्छेत्यादिना कौतं तु यद्युपाधिं विशदयति। यडित्था
दीति। स्वरूपं स्फोटरूपं। अंत्यवर्णबुध्या नितरां ग्राह्य। पूर्वपूर्वबुध्या तु ईषद्ग्राह्यो। अंत्यबुध्या स्फुटतरावभासनात्संहृ
तक्रमं। स्फोटस्यैकत्वात् तत्संहृतक्रमं। वक्त्रायदृच्छया डित्थादिशब्दे उपाधित्वेन संनिवेश्यते इत्यर्थः। ननु स्फोटस्य स्वरू
पस्योपाधित्वेन तदुपाधौ संकेतः कृतः कृत्वा तस्यैव वाच्यत्वे तस्यैव वाचकत्वमिति विरोधः स्यादिति चेन्न। स्फोटस्यैव व
तोऽभिव्यंग्यत्वाकारेण वाचकत्वं तस्यैव डित्थाद्यर्थारोपितत्वाकारेण वाच्यत्वमित्यध्ययनविधेः स्यात्तेनोप्यप्यायन
विधाय कृत्वेयद्विरोधादित्यर्थः। इतिशब्दोहेतौ। इतिशब्दोहेतौ। द्वितीयस्य जात्यादिविभागपरिसमाप्तिद्योतकः।
उक्तेर्थे संमतिमाह गोः शुक्ल इति। ननु प्राणप्रदत्वे जातिलक्षणं कालादेर्गुणत्वेन पठितेष्वणुत्वादिष्वति
व्यापकमित्याशंक्यते बी संकेतमात्रं तत्र। कस्य तस्य परमाणुव्यवहारः परमाणुत्वजातियोगादेव ततो नातिव्याप
कमित्याह परमाणुत्वादीनामिति। अथवा विशेषाधानहेतुर्गुण इत्यस्य व्यापकत्वं अणुमहद्दीर्घह्रस्वेति कार
ताकृतत्वेनाभिमतानामणुत्वादीनां नित्यत्वेन विशेषाधायकत्वाभावादित्याशंक्य तेषां वस्तुतो गुणत्वाभा
वादिना व्यापकमित्याह परमाणुत्वादीनामिति। परमात्वादीनामिति पाठे भावप्रधानो निर्देशः। न चैकत्वाद्यो
तेरूपाधित्वमस्य गुणादीनामुपाधित्वे प्रतिवस्तु भिन्नत्वादानन्त्यादिदोषस्तदवस्थ इत्याशंक्याह गुणतेति। आ
श्रयभेदाद्भिन्नत्वं प्रतीयते परमार्थतस्त्वेकमेव शुक्लादिगुणाः सर्वत्रेत्यर्थः। तदुक्तं। कर्मकृज्जातिरव्यक्ता जगत्य
कः सितो गुणः। इति। एकस्योपाधियदृच्छादेर्नैकत्वप्रतीतौ दृष्टांतमाह यथेति। मुकुरादर्पणाः। भेदइ चलनस्य

पितुं जातिरेवैकपपाद

तद्दलनुपपद्यते। जात्यादिरिसेतदुपपाद्यजातिरेवैकपपादयितुं। मुख्यत्वादिजातिं प्रतिपादयति। हिमेति। क्रियासु
जातिं प्रतिपादयति। गुडेति। डित्थादौ शब्देनानात्वं साधयति। बालेति। बालवृद्धकुमारतारुण्येन भिन्नेषु डित्थ
शब्दत्वं सामान्यमस्ति तदेव पिण्डे आरोपितं सत् डित्थशब्दाभिधेयमित्यर्थः। इदं तु वैनाशिकमतानुसारेण
अर्थं पिनानात्वमाह प्रतिक्षणमिति। प्रतिक्षणभिन्नेषु पिण्डेषु स्वाभाविकं डित्थत्वं सामान्यमभिधेयमित्यर्थः।
प्रत्यहं मुक्तान्तरसंप्रवेशात् शरीरांतरमिति। वैनाशिकमतानुसारेणाया। जातिरेवेति पक्षमुपसंहरति। इतीति।
नन्वमेतान्तरा व्यामपिसत्वलाक्षणिकुतो नोपन्यस्तानीत्यत आह तद्धानिति। जातिमात्र। जातिव्यक्त्याकृतयस्कोप
हार्य इति नैयायिकैः अपोह इतरव्यावृत्तिः संकेतित इति बौद्धैरुक्तोरयस्यर्थः। प्रयोजनसद्भावे गोरयम व्यङ्गीकार्य
मित्यत आह प्रकृतेति। मतद्वयोपन्यासे नैव संकेतितसाकल्यप्रतीतेर्मतान्तरोपन्यासो व्यर्थ इत्यर्थः। वाचकशब्दम
भिधाय जात्विकं विवक्षन् तदुपयुक्तलक्षणाया लक्षणोपयोगित्वेन मुख्यार्थमाह स इति। नाभिधा समया
ज्ञाया दित्यादौ अभिधाव्यवहारदर्शनान्मुख्यार्थनिरूपणमसक्तं तां येतां लक्षयति। तत्र मुख्य इति। श्लोकस्यस्य
स इत्यस्य अस्येत्यस्य यार्थमाह स इति। अस्येतीति। अत्र साक्षात्संकेतितेत्यनेन शब्दस्य व्यापारो लक्षणेत्येतावद्भ्र
वां मुख्य इति वक्ष्यमाणारोपितलक्षणापेक्षयोक्तं। अन्यथा साक्षात्संकेतितेत्यनेन शब्दस्य व्यापारस्ताद्भाचान्मुख्य इत्य
तामनर्थकं स्यात्। लक्षणाया लक्षणमाह मुख्यार्थेति। मुख्यार्थबाधतद्योगाभ्यामन्योर्थो लक्ष्यते प्रतिपाद्यत इति
यत्सा लक्षणेत्यर्थः। नन्वेवसतियच्छब्देन लक्ष्यत्वपरामर्शः स्यात्तथा च लक्षणायल्लक्ष्यत्वं लक्ष्यधर्मः लक्षणा तु लक्ष
कधर्म इष्यते। न। यच्छब्देन लक्ष्यतद्रूपतारव्यातद्गुणीभूतप्रतिपादनमात्रमेव परामृश्यते प्रतिपादनं तु प्रतिपादक
धर्म एवातो नोक्तदोषः। अथवा यतद्यतो व्यापारादन्योर्थो लक्ष्यते सा लक्षणा। सेति प्रतिनिर्दिश्यमानाभिगा। पा
दान। रूढितो प्रयोजनाद्वेति लक्षणाधिभागपरं। रूढिलक्षणा प्रयोजनलक्षणा चेति विभागः। न तु लक्षणां त
न्त्विति। तथाच्येककस्यातत्वाद्व्याप्तिः। तयोरनयोर्वैलक्षण्यं। कर्मणि कुशल इत्यादि। कुशान्लाति आदत्त इति कुशलइ
त्ति मुख्यार्थाभिमुखेन संभवतीत्याह इदं गृहणो। प्रयोजनलक्षणायामपि मुख्यार्थबाधं दर्शयति गंगायां घो

अतिशयेन न प्रतीतिः। तथेति

मइति। तथो गइति व्याकरोति। विवेचकत्वाद्यविति। रूढिलक्षणायां विवेचकत्वादिसंबंधः। प्रयोजनलक्ष
६ णायां सामीप्यादि। रूढितइत्यस्यार्थः प्रसिद्धेः। येषां पावनत्वादीनां। तथातिशयेन प्रतिपादनरूपात्। प्रा
शे पिच्चा क्रियेसे त घ्राय स्थेसइति। यद्यपि गंगायां घोष इत्यत्र गंगाशब्देन प्रत्यायितं स्रोतस्तीरं लक्षयति लक्षणा व्या
पारो लक्षणा न शब्दव्यापारः तथापि वाच्यधर्मो वाचके शब्दे आरोप्यते अतः शब्दो लाक्षणिक इत्यर्थः। आरोपे हेतुमा
b ह सान्तरार्थनिष्ठ इति। अन्तरं व्यवधानं तेन सह वर्तते व्यवहितस्तीरादिः। सो हि मुख्येन व्यवधीयते अतस्तीरा
दि विषयो व्यापारः मुख्यार्थगतत्वेन तु निरुक्त व्यापारः गंगाशब्दगतः अतः शब्देन संस्तयतीति तत्रारोप
इत्यर्थः। विलक्षणानामान्यायां रूढिलक्षणा रूपे स्य प्रयोजनलक्षणां विभजते स्वसिद्धय इति। प्रयोजनलक्षणा द्विवि
धा शुद्धा मिश्रा च। शुद्धा उपादानलक्षणा लक्षणलक्षणा चेति द्विविधा। स्वसिद्धये पराक्षेप इत्युपादान।
परार्थं स्वसमर्पणमिति लक्षणं। उपादानलक्षणामुदाहरणमुखेन व्याकरोति। कुन्ता इति। ततः कारणात् कुन्ता
नामात्मोपादानेनैव प्रवृत्त्यादुपादानल[illegible] अजहत्स्वार्थेत्यर्थः। अत्र प्रयोजनं याष्टिक्यप्रतीतिः। कुन्तिनः प्र
विशन्ति कुन्तानां याष्टिक्यप्रतीतिर्न[illegible]। केचित्तु गौरनुबन्ध्य इत्युपादानलक्षणाया उदाहरणमाहुः तन्म
तं दूषयितुमनुवदति। गौरिति। श्रुतेः प्रभुसम्मितत्वात् बन्धनस्यावरूपकं व्यक्तिं दर्शयति श्रुतिः। स्वबन्धनसिद्ध्यर्थं
जात्या व्यक्तिराक्षिप्यत इत्यर्थः। ननु किं लक्षणया व्यक्तिरभिधीयतां तत्राह विशेष्यमिति। अभिधा व्यक्तिरू
पं विशेष्यं धर्मितां न गच्छेत्। कुतः विशेषणे जातिरूपे धर्मे क्षीणतारा किंचिदव्यापारा। तत्र हेतुमाह न ह्यत्रेति।
कुन्ताः प्रविशन्तीत्यत्र याष्टिक्यप्रतीतिवदत्र न किंचित्प्रयोजनमस्तीत्यर्थः। न हि रूढिरस्तीत्याह नवेति। निर्वच
नानुपपत्तिरूपबाधाभावादित्यर्थः। यद्येवं कथं तर्हि व्यक्तिप्रतीतिरत आह अर्थादिति। लक्षणां विना अवि
नाभावेनैवाक्षेप इत्यत्रोदाहरणान्तरमाह पीन इति। अविरामग्रहपिंडीभक्षये स्यर्थः। पीनो देवदत्त इत्यत्रापि लक्ष
णां विना अविनाभावेनैवाक्षेप इत्याह पीन इति। यद्यपि भोजनाभावसहितपीनत्वमनुपपन्नं रात्रिभोजनस्य
पीनत्वस्य चैकाधिकरणत्वं संबन्धः दिवाभोजनरहितोप्ययं पीन इति कुरुबकैः श्लिष्टादि प्रयोजनं च संभव
ति तथापि श्रुतार्थापत्तेर्विषयत्वेन मुख्यार्थबाधाभावान्नेयं लक्षणेत्यभिप्रायः। इष्टः श्रु

श्रीरामो जयति। लोक इति। स्त्र्याद्यनुमाने कामाद्यनुमाने। अभ्यासः पौनःपुन्यं। तेन यत्पाटवं प्रज्ञातिशयः स्तद्वतां
सामाजिकानामित्यनेन तेषां केन संबंधः। अनुमानेत्यत्र। अयमेतद्विषयकरत्याश्रयः तत्सामग्रीमत्त्वात् कार्यवत्त्वाद्वा
न यदेवं न तदेवं यथा चित्रकः। तैः भ्रमदादिभिः। ननु यदि लोके तैरनुमानं तदा काव्येपि तथैवास्त्वित्यत आह का
रणत्वादिपरिहारेणेति। परिहारास्फुरणात्। तथा च व्याप्यतावच्छेदकरूपताज्ञानात् सामाजिकनिष्ठानाम लौकि
कसुखस्य चिह्नपातारत्यादीनां तदकार्यत्वात्तदकारणत्वान्नानुमानमिति भावः। विभावनादीति। बीजादेर
ङ्कुरदशाप्रापकावयवश्लथीभावइव सामाजिकरत्यादेरुन्मुखीकारणं विभावनं। धरतीति ग्रामसंयोगादुच्छू
नत्वदशा। विशेषापादनमनुसंधानं। अंकुर इवेषद्धक्कीभूतस्य पिप्राक् ध्व्यभिचारतामित्येवं व्यापारत्रययोगा
दित्यर्थः। एतदेव च तेषामलौकिकत्वं। अलौकिकेति। तथा च ग्रामालौकिकव्यवहार एव वर्तमानमित्यर्थः। ननु
साधारण्येन प्रतीत्यर्थमुपायान्तरकल्पने गौरवमत आह ममैवेति। तथा चासाधारण्येनानवगम एव सा
धारण्यमित्यर्थः। अनुभवं प्रमाणयति। अनेन साक्ष्यादिति। इदमुपलक्षणं। कारणत्वादिना सीतात्वादिना
स्त्रीत्वादिना याननवसायादित्यपि द्रष्टव्यं। नवपदार्थतावच्छेदकरूपेण तत्पदार्थस्य शाब्दबोधविषयत्वाके
थमेवमिति वाक्ये। दोषाभावगुणालंकारमहिम्ना व्याजनिकचर्वितास्वादयामुत्तरप्रतीतौ तथानवभासादि
राधात्। मन्मया। ह्रिरदान्परुपता वाक्स्पन्दमयत्वादिविशेषमपरुस्यादिरदसामान्यप्रतिभासवत्। तदुक्तौ
श्रीउत्तामृन्मये यद्वद्यालावनो ह्रिरदादिभिः। उत्साहः स्वदृततद्धक्कौ दृढतामर्जुनादिभाःरिति। अभिमतकौ
विषयतापादितः। वासनात्मतयेत्यनन्तरपूर्वमिति श्लोकः। वासनासंस्कारस्तस्य तात्स्वभावः सोऽस्य तद्रूप
तया स्थित इत्यर्थः। विभावाद्यविषयीकरणमेव तस्य साध्यं। स्थायी नित्य8 अखण्डानन्दस्वरूपः। नियतप्रमा

7

हृद्गतत्वेन न तत्र सुरुषीयत्वेन।साधारणोपायबलात्।उपाया विभावादयस्तेषां साधारण्यादसाधारण्येना
विषयीभूतत्वादितियावत्।तत्काले व्यांजनिकबोधकाले विगलितोऽविषयीकृतापा परिमितप्रमातृता
तत्र सुरुषीयता तद्वशादुन्मिषितोऽभिमानविषयीकृतोऽनुपारमार्थिको परिमितभावोऽपरिमित
त्वे यस्य तेन प्रमात्रा स्थायिना।सकलहृदयसंवादभाजा।सर्वसामाजिकहृदयदया विभूतिस्थायित्वेन।साधार
ण्येन परिमितत्वापरिमितत्वाप्रकारकत्वेन।ननु स्थायी कथं तस्य च विषयः भेदाभावाद्विषयविषयिभावस्ये
त्यत आह स्वाकार इवेति।विज्ञानवादिमते ज्ञानाभिन्नस्य घटपटादेर्ज्ञानाकारस्य ज्ञानविषयतावत्स्थायिनः स्थायि
विषयत्वाविरोध इति भावः।चर्व्यमाणः स्थायिना विषयीक्रियमाणो विभावादिस्तदेकप्राणः।तदेव विवृणोति।
विभावादीति।विभावादेर्जीवितं स्थायिना विषयीकरणात्तदेवावधिरवस्थानं सीमा यस्य सः।तथा च यावदेव वि
भावादिविषयता तावदेव तस्य रसरूपत्वात्तदविषयतायां तु तस्य स्थायिरूपतेति भावः।ननु समूहालम्बना
को रस इति पर्यवसन्नं तच्च न सम्भवति।घटपटादिवत् विभावादीनां पार्थक्येन प्रतीतिप्रसंगात्।न च तदंशेऽ
साधारणधर्मनिवेशात्सान्न पार्थक्यप्रतीतिरिति वाच्यं।निर्विकल्पकरूपसमूहालम्बनस्यास्य द्विकत्वादि
त्यत आह प्रपानकेति।तथा यथा तत्र समूहालम्बनरसो ह्येष न मरिचीयत्वाद्यसाधारणधर्मविज्ञासस्तथात्रा
पीति नासौ द्विकत्वमिति भावः।रसस्यालौकिकचमत्काररूपत्वेऽनुभवं प्रमाणयति।स्फुरन्निवेति।सर्वांगीण
मिति।तथा चेत्सुखस्य पादेमे सुखमित्यादिप्रतीतिगोचरसुखस्य चमत्कारादलौकिकत्वमिति भावः।ब्रह्मेति।अ
नेनालौकिकत्वं सुखात्मकत्वं च दर्शितं।चमत्कारकारी चमत्काररूपः।स्थायिवदसामान्यात्तथा चित्।
रत्यादयस्ता च स्वप्रकाशज्ञानसुखस्वरूपा नित्या नवविधाः।विभावाद्यविषयतादशायां स्थायिरूपास्तद्वि रू
षयतादशायां शृंगारादिरूपा इति व्यपदिश्यन्त इति समुदायार्थः।विभावादिभ्यो रत्यादिप्रतीतिस्तथा चासुख

मुत्पद्यते तच्च मनसा गृह्यत इति मतं निराकरोति। सत्येति। विनाशादिनाशेऽपीति। विभावादिज्ञाननाशेऽपीत्यर्थः।
संभवस्य सत्त्वस्य प्रकर्षेणासंगात्। विभावादिज्ञाननाशेऽपि सत्त्वादित्यर्थः। शङ्कते विभावादीनां सतो रसादी
नां वतः सुखो सत्त्विः ततोऽस्यानुत्तय इति निरूपनायकं विभावादिज्ञानानां विनाशान्न विभावादीनां रसादीनां सुख
नुभवविषयतासंभवः। रसस्य च तत्त्रितयविषयविज्ञानरूपत्वमानुमानिकमपक्षेऽनुमतशक्यमेवा रसाद्यविषयता
यांच शृङ्गारादिव्यपदेशोऽपि वीजाभाव इति भावः। योभावनासंगमती सविते विवर्तमानो गुणासंभवः सन्नाभावादि
भावादनुभावतश्च प्रकाशमप्येतु वहीरसोऽसाविति वचनात् नित्य एव रसो विभावादिपरामर्शेन ज्ञाप्यत इति मत
मपाकरोति। तापि ज्ञाप्य इति। सिद्धस्येति। विभावादेः पूर्वं पश्चाद्धि तस्य प्रतीत्यभावेन नित्यत्वे प्रमाणाभावादित्यर्थः।
केचित्तु सत्ये स्यादि ग्रंथो न परमतनिराकरणपरोऽपि तु स्वमत स्वमतस्वरूपकथनपर एव रसस्य कार्यत्वे विभा
दिज्ञानानामेव कारणत्वं वाच्यं तेषां च निमित्तकारणत्वेन तन्नाशेऽपि रसनाशानुभवानुपपत्तिः। कार्यस्यानि
मित्तनाशानारूपत्वादर्शनात् सर्वरसस्यासत्त्वाञ्जनज्ञाप्यत्वमिति तदृष्टादित्याहुः। विभावादिभिरिति। तद्भेदेने
त्यर्थः। व्यंजितः विषयितां प्राप्तः। एतदेव विघूर्णते इति चर्वणीय इति। व्यज्यते विषयीक्रियते विभावादयोऽनेन रसेने
ति करणे नीयः। तेन कारकत्वज्ञापकत्वाभावेऽपीत्थं हेतुत्वमित्यर्थः। न क्वचिदिति। अनुभवादयः सिद्धावदृष्टव
रत्वमकिंचित्करं। केवलमन्यत्र दृष्टत्वमहो निपुणता तत्र। दृष्टान्तं यथा स्वसय लंपटस्य दोषानुमानवदितीति भावः।
भूषणमिति। अलौकिके कार्ये हेतोरप्यलौकिकस्यौचितत्वादिति भावः। कार्यत्वाच्च भावरसनिष्पत्तिरिति संज्ञावि
वोधद्वयत्वमाह चर्वणानिष्पत्त्या। तास्थायिनो विभावादिविषयत्वं चर्वणासा च विभावादिरूपोपनायकसाध्ये रू
वेति सर्वथाऽस्य कार्यत्वेन सर्वथा ... कार्यं चोपकारक इत्यर्थः। वस्तुतः सर्वथापि विषयता विशेषज्ञानरूपस्य च

यिस्वरूप एवेति । तदंशोऽपि न कार्य इत्यपरुद्धं प्रकाशयति उच्यतामिति । तथा चोत्तरकालेऽसंपर्कमात्रेऽपि वक्तव्येऽपना
वलारमात्रमिति भावः । रसः प्रतीयत इति व्यवहारः समर्थयति । लौकिकेति । प्रमाणाप्रमिति । इंद्रियाजन्यत्वेन ततो वा
लक्षण्यं पायुं ज्ञानयोगिज्ञानवैलक्षण्यमाह ताटस्थ्येति । आसन्नज्ञानेत्यर्थः । ताटस्थ्यभेदस्तद्विषयकबोधस्यर्थ
8 इति केचित्तु रसस्य विगलितवेद्यांतरत्वेन ततो भेदः । युक्तयोगिज्ञानवैलक्षण्यमाह वाद्येत्यादि घोष्येति । वेद्यो वि
षयश्चात्मेतरः । विभावादीनामत्र भानात्तद्वैलक्षण्यं । स्वसंवेदनेति । स्वप्रकाशेत्यर्थः । अज्ञाप्यत्वे हेत्वंतरमप्याह
ग्राहकं चेति । विभावादीति । विभावादीनां परामर्शो ज्ञाने तत्प्रधानत्वात्तज्जन्यत्वात् । तथा च ज्ञानजन्यत्वेन न निर्वि
कल्पकत्वमिति भावः । परामर्शः संबंधः । संबंधाविषयकज्ञानस्य निर्विकल्पकत्वादिति भावः इति केचित्तु नन्वेवं
ज्ञानजन्यत्वे तु तस्यास्तस्य सविकल्पकत्वे सति आह नापीति । विशेषणाज्ञानजन्यत्वेन हि सविकल्पकता न तु ज्ञान
मात्रजन्यत्वेन निर्विकल्पकस्यापीश्वरज्ञानजन्यत्वेन सविकल्पकत्वापत्तेरिति भावः । ज्ञानस्य सविकल्पके घटं जा
नामीत्यादौ मितिमात्रप्रत्ययश्च यं भासते न चैवं तथा मितिमात्रभानादित्याह स्वसंवेदनेति । केचित्तु नापि सविकल्पक
मितस्य नापि स्वाभिन्नसविकल्पकमित्यर्थः । स्वाभिन्नसविकल्पकं चारुकमिष्टमेवेत्याह व्यभाणास्येत्यादिना
तिपाङ्क । नन्वेकविषयत्वाभावोऽपरविषयत्वनियतः परस्परविरोधेन प्रकाशमानस्थितिरिति न्यायात्तथा चैके
कनिषेधे उभयविषयत्वस्य परस्परविरुद्धस्य प्रसक्तिरित्यत आह उभयाभावरूपस्येति । लोकोत्तरतामिति । अ
नुभवानुरोधेन विलक्षणा ज्ञानविषयता स्वाभिन्नसविकल्पकविषयतेत्यर्थः । नतु विरोध इति । चित्ररूपकल्प
नायामिवेति भावः । तथा च विभावादीनां संयोगाद्विषयतास्वरूपसंयोगाद्रसस्य निःपत्तिरभिव्यक्तिरिति सूत्रार्थ इति
निर्गलितार्थः ॥ ॥